# श्री सुरसरस्वती सभा शृङ्गेरि

Jan - 2009 (1)

## तृतीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः – १-२-२००९ | अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् | समयः–घण्टात्रयम्

**1 एकवाक्येन संस्कृते उत्तरं लिखत । ( अष्टानामेव)** 8

१. केन समस्या पूरिता ?
२. मल्लस्य नाम किम् ?
३. धर्मव्याधः कुत्र न्यवसत् ?
४. चित्रग्रीवः कः ?
५. भूतानां प्रलयोदयौ कौ ?
६. कृषिं कुर्वता ब्राह्मणेन किं न लब्धम् ?
७. कालटिग्रामः कुत्र अस्ति ?
८. वृक्षस्योपरि का स्थिता ?
९. द्रोणस्य प्रसिद्धः शिष्यः कः ?
१०. अमरशक्तेः कति पुत्राः ?

**2 वाक्यद्वयेन संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 10

१. गणेशं के कदा नमस्कुर्वन्ति ?
२. भोजः सर्वान् कवीन् आहूय किम् अवदत् ?
३. गोप्यानि कानि ?
४. कौशिकः पक्षिणं कुतः क्रूरया दृष्ट्या अपश्यत् ?
५. मल्लः परिकरं बद्ध्वा राजानं किमुवाच ?
६. शङ्कराचार्यस्य प्रसिद्धाः शिष्याः के ?

**3 संस्कृतभाषया पञ्चशैः वाक्यैः उत्तरं लिखत। (त्रयाणामेव)** 9

१. विष्णोः आकारं वर्णयत ।



पश्चादनुवर्तते

२. हनूमान् सीतां कथं आश्वासयामास ?
३. गृहिणी द्विजं किम् अवदत् ?
४. विष्णुशर्मणः प्रतिज्ञा का ?

**4 मातृभाषया उत्तरं लिखत । (त्रयाणामेव)** 12

१ देवैः कृतं ब्रह्मस्तवं निरूपयत ।
२. केषां मतिः क्षीयते ? विवृणुत ।
३. पतिव्रतायाः माहात्म्यं पाठानुसारं विशदयत ।
४. 'पञ्चतन्त्र कथामुखम्' अस्य पाठस्य सारांशं लिखत ।

**5 स्वेष्टभाषया सन्दर्भं सूचयत :- (चतुर्णाम्)** 12

१. शयीमहि महीपृष्ठे ।
२. गलं भित्वा अश्नाम ।
३. सर्पेण युक्तमेव कृतम् ।
४. कुतो विद्यार्थिनः सुखम् ।
५. ''कथमिमे गिरिमुद्धर्तुं शक्नुयुः'' ?

**6 द्वयोःअन्वयानुसारम् अर्थं स्वेष्टभाषया लिखत ।** 4

१. एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणी भवेत् ।।

२. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ।।

३. पादपं कश्चिदारुह्य तत्पलाशैः सुसंवृतः ।
आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ।।

**7 श्लोकद्वयं पूरयत ।** 4

१. दोर्भिर्युक्ता .................................. सुप्रसन्ना ।।
२. निन्दन्तु.......................................पदं न धीराः ।।
३. जयन्ति.......................................भयम् ।।

**8** **भाषान्तरं कुरुत :-** 5

तस्मिन्नेव समये चित्रग्रीवनामा कपोतराजः सपरिवारः वियति विसर्पन् तण्डुलकणान् अवलोकयायास । ततः सः चित्रग्रीवः तण्डुलकणलुब्धान् कपेतान् प्रत्याह – ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? भद्रमिदं न पश्यामि । सम्यक् निरूप्यतां तावत् । सर्वथा अविचार्य कर्म न कर्तव्यम्'' इति ।

**9** **रिक्तस्थानं पूरयत ।** 4

१. न जाने किं ..................... भविष्यति ।

२. आपत्काले ..................... वचनं ग्राह्यम् ।

३. अचक्षुषां चक्षुः .................. ।

४. कास्मिंश्चिदधिष्ठाने हरिदत्तो नाम ................. आसीत् ।

**10** **समानार्थकपदं लिखत । (त्रयाणामेव)** 3

१. भुजङ्गमः २. शुश्रूषा ३. सलिलम् ४. वायसः

**11** **विरुद्धार्थकपदं लिखत (त्रयाणामेव) ।** 3

१. उपक्रमः २. भद्रम् ३. प्रकाशः ४. धीरः

**12** **वाक्यदोषं परिहरत । (त्रयाणामेव)** 3

१. रामः पाठशालां गच्छतः । २. ब्राह्मणस्य कलत्रं पुष्पाणि स्पृहयति ।

३. मातुः सह बालः क्रीडति । ४. भवान् गच्छ ।

**13** **वाक्ये योजयत । (त्रयाणामेव)** 3

१. साधयामि २. मम ३. तस्मै ४. प्राक्

**14** **क्रियापदं पुरुषत्रये लिखत । (एकमेव)** 3

१. अभूत् २. क्षीयते ३. कारयामास



पश्चादनुवर्तते

**15** **सन्धिं विभज्य नाम लिखत ।** 3

१. वागीशः २. उपविशत्वार्यः ३. हरिरस्ति

**16** **लोकोक्तिमेकां पूरयित्वा अर्थं विवृणुत ।** 3

१. प्रक्षालनाद्धि............................ ।

२. याञ्छा.................................. ।

**17** **द्वयोः प्रयोगं परिवर्तयत ।** 3

१. नाहं विद्याविक्रयं करोमि । २. तेन पूजा न कृता ।

३. भवान् गृहे भवति ।

**18** **व्याकरणविशेषं सूचयत । (एकस्य)** 2

१. गुरवे नमः २. व्याघ्रात् भयम्

**19** **समूहेतरपदं लिखत ।** 3

| | | | | |
|---|---|---|---|---|
| १. | ददाति, | एधते, | जयति, | बभूव |
| २. | राजा, | नृपतिः, | भूपालः, | मृगाधिपः |
| ३. | करः, | खरः, | शिरः, | कण्ठः |

**20** **कर्तृ-कर्म-क्रियापदं च लिखत ।** 3

१. कौशिकः भैक्ष्याय ग्रामम् अगच्छत् ।

२. योगी कश्चित् उज्जयिनीं प्रत्यागच्छत् ।

३. कालिदासः राजानं व्यजिज्ञपत् ।

★ ★ ★ ★ ★

# श्री सुरसरस्वती सभा शृङ्गेरि

## तृतीया परीक्षा

Jan ~~Aug~~ – 2009 (2)

## द्वितीयपत्रिका

दिनाङ्कः – १-२-२००९ अङ्काः–५०

अपराह्णे – १-३० तः ३-०० पर्यन्तम् समयः–सार्धैकहोरा

**1 दशवाक्यैः संस्कृतेन प्रबन्धम् आरचयत :- (एकमधिकृत्य)** 5

१. संस्कताभ्यासः कुतः ? २. पुस्तकभण्डारः ३. आतङ्कवादः

**2 संस्कृतेन पत्रमेकं लिखत :-** 5

विरामार्थं आवेदनपत्रम्

अथवा

पित्रा पुत्रं प्रति लिखितं पत्रम्

**3 द्वयोः सलक्षणं विवरणं स्वेष्टभाषया दत्त :-** 6

१. अव्ययानि २. उपसर्गाः ३. विशेषणानि

**4 क्रियापदद्वयं सर्वपुरुषवचनेषु लिखत :-** 6

१. मोदताम् २. गमिष्यति ३. अपिबत्

**5 एकस्य सुबन्तस्य सकलविभक्तिरूपाणि सर्वेषु वचनेषु लिखत :-** 4

१. राजन् २. युष्मद् ३. तद् (पुल्लिङ्गः)

**6 वाक्यदोषान् परिहरत :-** 4

१. गङ्गा हिमालयेन प्रवहति ।

२. प्रजाभिः स्वस्ति ।

३. गुरोः अभितः छात्राः उपविशन्ति ।

४. काया वाचा मनसा सत्यमेव वद ।



पश्चादनुवर्तते

**7** **प्रयोगं परिवर्तयत :-** 4

१. माता शिशुं लालयति । २. सीतया नर्त्यते ।
३. त्वं गृहं गच्छ । ४. अहं चलच्चित्रम् अपश्यम् ।

**8** **निर्दिष्टं पदं भित्वा प्रत्ययं सूचयत :-** 4

१. उपदिश्य २. भक्षयितुम् ३. लिखितवती ४. पश्यन्

**9** **वाक्यमेकं स्वेष्टभाषया विवृणुत :-** 2

१. नास्ति मातृसमो बन्धुः ।
२. सहसा विदधीत न क्रियाम् ।

**10** **अनुवादं कुरुत :-** 5

१. अस्मिन् दर्पणे तव मुखम् ईक्षस्व ।
२. त्वं शुचीनि वस्त्राणि धरेः ।
३. काशीनगरे कश्चन विद्वान् अभवत् ।
४. कपोताः धान्यानि भक्षयितुं आगच्छन्ति ।
५. अहं पित्रा सह ग्रामं गच्छामि ।

**11** **संस्कृते अनुवदत :-** 5

१. Mother give Sweets.
ತಾಯಿಯು ಮಿಠಾಯಿಗಳನ್ನು ಕೊಟ್ಟಳು.
२. Stars shine in the sky.
ನಕ್ಷತ್ರಗಳು ಆಕಾಶದಲ್ಲಿ ಪ್ರಕಾಶಿಸುತ್ತವೆ.
३. I forgot everything by watching Drama.
ನಾಟಕವನ್ನು ನೋಡುತ್ತಾ ನಾನು ಎಲ್ಲವನ್ನೂ ಮರೆತೆನು.
४. By reading Ramayanam you will get peace.
ನೀನು ರಾಮಾಯಣವನ್ನು ಓದುವುದರಿಂದ ನೆಮ್ಮದಿಯನ್ನು ಪಡೆಯುವಿ.
५. Gopikas dance around Krishna.
ಗೋಪಿಕೆಯರು ಕೃಷ್ಣನ ಸುತ್ತಲೂ ಕುಣಿಯುತ್ತಾರೆ.

★ ★ ★ ★ ★